प्रारम्भाब्दः १९६४ ई.तः

ISSN 2348-9847

# सुरभारती

वर्षम् - ५२

अङ्कः ५२

## (शताब्दी विशेषाङ्कः)

वार्षिकी शोधपत्रिका २०१५ -१६



THE MAHARAJA SAYAJIRAO UNIVERSITY OF BARODA

सत्यं शिवं सुन्दरम्

पारम्परिकसंस्कृताध्ययनविभागः

बरोडासंस्कृतमहाविद्यालयः

महाराजसयाजीरावविश्वविद्यालयःवटोदरम्

...N 2348-9847

# उपनिषत्सु शैक्षिकदर्शनम्

जानकीशरणः


शोधसारः

व्यक्तित्वविकासाय शिक्षा अन्यतमं साधनं तु वर्तत एव किन्तु आस्तिकदर्शनानुयिभ्यः पुरुषार्थचतुष्टयस्य साधनमपि वरीवर्ति। अत एव वैदिकवाङ्मये शिक्षायाः न केवलं महत्त्वं समुद्घोषितं प्रत्युत शिक्षाव्यवस्थायाः विवरणमपि यथावसरं सोदाहरणं वर्णिमस्ति। तत्र उपनिषत्सु शिक्षाविषयकानि यानि महत्त्वपूर्णानि तत्त्वानि उपलभ्यन्ते, तान्येव आधारीकृत्य भारतराष्ट्रमिदं विश्वगुरुपदे प्रतिष्ठापितमभूत्। तैत्तिरीयोपनिषदि तु शिक्षाविषये पृथग्रूपेण "शिक्षावल्ली" इत्याख्या एका वल्ली वर्तते यत्र च वैदिकशिक्षायाः साङ्गोपाङ्गस्वरूपं शिक्षाविषयकसमस्तमूलसिद्धान्तस्य विवेचनं सोदाहरणं प्राप्यते। यथा-

"शिक्षां व्याख्यास्यामः। वर्णः स्वरः। मात्रा बलम्। साम सन्तानः। इत्युक्तः शिक्षाध्यायः।", "सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः। मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। इति।

तत्र विद्यमानानि अमूल्यानि शिक्षारत्नानि अधुनापि भारतीयशिक्षाव्यवस्थायां नितराम् उपयोगिनि सन्ति। वैदिकसाहित्ये शिक्षाशब्दस्य प्रयोगः विविधेष्वर्थेषु कृतः, तद्यथा विद्या, ज्ञानं, बोधः, विनयः इत्यादिषु। आधुनिकशिक्षाशास्त्रिवत् पुरातनैः मनीषिभिरपि शिक्षायाः प्रयोगः व्यापकसीमितयोरर्थयोः कृतः। यथा वेदाङ्गत्वेन विहितायाः शिक्षायाः प्रयोजनं वेदानां शुद्धोच्चारणरूपं वर्तते। उक्तञ्च सायणाचार्येण ऋग्वेदभाष्यभूमिकायां- "स्वरवर्णाद्युच्चरणप्रकारो यत्र शिक्ष्यते उपदिश्यते सा शिक्षेति।" तथापि शिक्षाशब्दस्य व्यापकत्वात् ब्राह्मणग्रन्थेषु शिक्षासम्बद्धनियमानामुल्लेखो यत्र तत्र प्राप्यते। येन आत्मैकत्वज्ञानेन मोक्षलाभो भवति तस्य ज्ञानस्य सिद्धिः शिक्षाधीना भवति। शिक्षाशब्दस्य पर्यायः विद्या इति वर्तते। उपनिषत्सु द्वे प्रकारके विद्ये उपलभ्येते – काम्यविद्या, ब्रह्मविद्या च। अथवा परा अपरा च। तत्र ऐहिकफला उद्गीथादिविद्या, मुक्तिफला तु दहरादिविद्या। अपि च प्रत्येकं वेदस्य शिक्षाग्रन्थाः वर्तन्ते, यत्र च वैदिकमन्त्रोच्चारणविधेः वर्णनं प्राप्यते। एतस्याः शिक्षायाः उपनिपत्सु कानिचन उद्देश्यान्यपि निर्दिष्टानि सन्ति यानि च अधुनापि मानवजीवनस्य पथप्रदर्शकरूपेण उपयोगिनि सन्ति। एवञ्च शोधपत्रेऽस्मिन् उपनिपत्कालीनशैक्षिकदर्शनस्य तत्त्वानि विशदीकृत्य शिक्षायाः स्वरूप-प्रकार-विधि-उद्देश्यविपये विवरणं कृतमस्ति।


**प्रास्ताविकम्** – विश्वस्मिन् शिक्षायाः गौरवं सर्वैः लोकैः तारस्वरेण गीतम्। लोकेऽस्मिन् शिक्षा विद्या वा ज्ञानज्योतिं प्रकाशयति, अविद्यान्धतमसं व्यपोहति, दुर्गुणग्रामं वारयति, सद्गुणगणं सञ्चारयति, कीर्तिं प्रथयति, गौरवं वर्धयति, यशं प्रसारयति, भूभृत्सु च आदरम् आवहति।





विद्याज्ञानबुद्धिप्रभृतिपदव्याजेन वैदिकवाङ्मये शिक्षायाः न केवलं महत्त्वं समुद्घोषितं प्रत्युत शिक्षाव्यवस्थायाः विवरणमपि यथावसरं सुस्पष्टरूपेण वर्णिमस्ति। आर्षज्ञानराशयः वेदाः, त एव विविधदर्शनवेदाङ्गस्मृतीतिहासपुराणतन्त्रागमकाव्यसङ्गीतकलाद्यात्मना विविधशाखोपबृंहितस्य अतिविस्तृत-लौकिकालौकिकसंस्कृतवाङ्मयस्य मूलभूताः भवन्ति। अत्र न केवलम् अलौकिकपरमपुरुषार्थमोक्षविषयकाः विचाराः अपि तु तदङ्गतया लौकिकाभ्युदयाय इहलौकिकश्रेयसे अपि विचारः जागर्ति। वेदोक्तगभीरविषयाः उत्तरकाले ऋषिभिः ऋषिकल्पैश्च सरलीकृताः। वेदे प्रथितस्य कर्मकाण्डभागस्य आचरणार्थम् अर्थवादानाम् आवश्यकता वर्तते, किन्तु ज्ञानकाण्डप्रधाने उपनिषद्भागे नैव दृश्यते अर्थवादानामावश्यकता। तत्र कारणमस्ति उपनिषदां विषयप्रतिपादनशैली, बोधनरीतिश्च। तत्र उपनिषत्सु शिक्षाविषयकानि महत्त्वपूर्णानि तत्त्वानि उपलभ्यन्ते, तान्येव आश्रित्य भारतराष्ट्रमिदं विश्वगुरुपदे प्रतिष्ठापितमभूत्। तैत्तिरीयोपनिषदि तु शिक्षाविषये पृथग्रूपेण "शिक्षावल्ली" इत्याख्या एका वल्ली वर्तते यत्र च वैदिकशिक्षायाः साङ्गोपाङ्गस्वरूपं शिक्षाविषयकसमस्तमूलसिद्धान्ताः बोभूयन्ते। यथा- "शिक्षां व्याख्यास्यामः। वर्णः स्वरः। मात्रा बलम्। साम सन्तानः। इत्युक्तः शिक्षाध्यायः।[1]" इति।

**शिक्षायाः अर्थः –**

"सा विद्या या विमुक्तये[2]" इति खलु आर्षोक्तिः। "अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते[3]" इति च वेदघोषः। उपनिषत्सु द्विप्रकारके विद्ये उपलभ्येते – काम्यविद्या, ब्रह्मविद्या च, अथवा परा अपरा च। ऐहिकफला उद्गीथादिविद्या अर्थात् यया विद्यया लौकिकं ज्ञानं जायते सा अपरा विद्या, यया च अक्षरब्रह्मविषयकं ज्ञानं जायते सा परा विद्या अर्थात् मुक्तिफला दहरादिविद्या। अपि च प्रत्येकं वेदस्य शिक्षाग्रन्थाः वर्तन्ते, यत्र च वैदिकमन्त्रोच्चारणविधेः वर्णनं प्राप्यते। एतस्याः शिक्षायाः उपनिषत्सु कानिचन उद्देश्यान्यपि निर्दिष्टानि सन्ति।

**शिक्षायाः शाब्दिकार्थः –**

शिक्षा शब्दस्य निष्पत्तिः "शिक्षा विद्योपादाने" इत्यस्माद्धातोः भवति, यस्य च अर्थः भवति शिक्षणम् अध्ययनम् वा। अन्यरूपेणापि का नाम शिक्षा इति प्रश्ने सति "शिक्ष्यते भाष्यते अनया इति शिक्षा" अर्थात् यया वर्णादीनामुच्चारणज्ञानं भवति सा शिक्षा। एवमेव "विद्या" इति शब्दः "विदॢ उपादाने" इति धातोः निष्पन्नोऽस्ति। अयमपि शब्दः पूर्वोक्तार्थमेवाभिप्रैति। प्राचीनकाले शिक्षाशब्दस्यप्रयोगः "अनुशासनम्" इत्यर्थेऽपि कृतो वर्तते।[4] वस्तुतः शिक्षायाः अपरं प्रसिद्धं नाम अनुशासनमेव अस्ति।

---

[1] तैत्तिरीयोपनिपदि शिक्षावल्ली

[2] विष्णुपुराणम्, १.१९.४१

[4] ईशोपनिषत्, ११

वैदिकसाहित्ये शिक्षाशब्दस्य प्रयोगः विद्या, ज्ञानं, बोधः, विनयः इत्यादिषु विविधेष्वर्थेषु कृतः। आधुनिकशिक्षाशास्त्रिवत् पुरातनैः मनीषिभिरपि शिक्षायाः प्रयोगः व्यापकसीमितयोर्थयोः कृतः। यथा वेदाङ्गत्वेन विहितायाः शिक्षायाः प्रयोजनं वेदानां शुद्धोच्चारणरूपं वर्तते। उक्तञ्च सायणाचार्येण ऋग्वेदभाष्यभूमिकायां- "स्वरवर्णाद्युच्चारणप्रकारो यत्र शिक्ष्यते उपदिश्यते सा शिक्षेति।" शिक्षाशब्दस्य व्यापकत्वात् ब्राह्मणग्रन्थेषु शिक्षासम्बद्धनियमानामुल्लेखो यत्र तत्र प्राप्यते। येन आत्मैकत्वज्ञानेन मोक्षलाभो भवति तस्य ज्ञानस्य सिद्धिः शिक्षाधीना भवति।

**शिक्षायाः दर्शनस्य च सम्बन्धः –**

दर्शनशास्त्रं मानवजीवनस्य लक्ष्यं निर्धारयति, शिक्षा च निर्दिष्टस्य लक्ष्यस्य सिद्ध्यर्थं मानवं तत्र प्रवर्तयति। दर्शनं विना शिक्षा लक्ष्यविहीनत्वात् अन्धः भवति, शिक्षां विना च दर्शनशास्त्रं प्रवृत्तेरभावात् पङ्गुः भवति। अतः दर्शनस्य शिक्षायाः च मध्ये अस्ति कश्चित् अविनाभावसम्बन्धः। पुरुषार्थचतुष्टयस्य सिद्ध्यर्थमद्वितीयं साधनं वर्तते शिक्षा। निश्चितोद्देश्यप्राप्त्यर्थं यदा कश्चन शिष्यः गुरोः सकाशात् विद्यार्जनं करोति तदा तस्य समक्षं लक्ष्यप्राप्त्यर्थं न कापि समस्या भवति। अतः प्राचीनकाले "अमृतं तु विद्या[5]", "विद्ययामृतमश्नुते[6]" इति लक्ष्यं मनसि निधाय विद्याध्ययनं क्रियते स्म। अपि च साक्षात्कृतधर्माणः ऋषयः तपोबलेन वेदानां साक्षात्कारं कृत्वा ज्ञानं प्राप्तवन्तः।[7] तदनन्तरं ये साक्षात् वेदान् प्रत्यक्षीकर्तुम् असमर्थाः आसन् तेभ्यः ते ऋषयः वेदज्ञानोपदेशं सम्प्राददुः।[8] यदा तु धारणाशक्तेः ह्रासकारणात् तेऽपि एतान् उपदेशान् यथायथं ग्रहीतुमशक्ताः अभवन् तदा वेद-वेदाङ्गानां ग्रन्थरूपेण समाम्नातमभूत्।[9] एवञ्च तदनन्तरम् अध्ययनाध्यापनयोः परम्परा आरब्धा

**उपनिषच्छिक्षायाः उद्देश्यानि –** यद्यपि "सा विद्या या विमुक्तये" इत्येव शिक्षायाः परमं लक्ष्यमस्ति। तथापि अस्याः शिक्षायाः कानिचन उद्देश्यानि निम्नरूपेण निर्धारयितुं शक्यन्ते-

- ज्ञानम् एवम् आत्मानुभूतिः, अनया च मनुष्यस्य नैसर्गिकशक्तीनां सम्यक्तया विकासः।
- व्यक्तित्वविकासेन वास्तविकमनुष्यस्य सर्जनम् अर्थात् इहामुत्र सफलजीवनाय अपेक्षितक्षमतानां विकासः।

[4] "एतदनुशासनम्" – तैत्तिरीयोपनिषत् १.११.४

[5] श्वेताश्वतरोपनिषत्, ५.१

[6] ईशोपनिषत्, ११

[7] "साक्षात्कृतधर्माण ऋषयो बभूवुः" – यास्ककृतनिरुक्तभाष्यभूमिका, १.१९

[8] "ते अवरेभ्योऽसाक्षात्कृतधर्मेभ्य उपदेशेन मन्त्रान् सम्प्राददुः" – यास्ककृतनिरुक्तभाष्यभूमिका, १.१९

[9] "उपदेशाय ग्लायन्तोऽवरे बिल्मग्रहणायेमं ग्रन्थं समाम्नासिषुः, वेदं च वेदाङ्गानि च" यास्ककृतनिरुक्तभाष्यभूमिका, १.१९





- आध्यात्मिकजीवनस्य सर्वाङ्गीणविकासः।
- चरित्रनिर्माणम् एवं सामाजिककुशलतायाः निर्माणम्।
- पशुतुल्यमानवस्य देवतुल्यमानवरूपेण निर्माणम् एवं कर्त्तव्यपालनस्य भावना।
- उत्तरोत्तरसोपानानां प्राप्तिः।
- राष्ट्रियतायाः संस्कृतेश्च संरक्षणं प्रसारश्च।

**उपनिषत्काले शिक्षायाः केन्द्राणि –**

उपनिषत्काले शिक्षायाः प्रारम्भिककेन्द्रं प्रायः गृहमेव अभवत्। पितैव प्रथमगुरुः भवति, अत्र पितृशब्दे मातृशब्दोऽप्यन्तर्गतः। पितरौ स्वसन्ताने गुणानां, संस्काराणां, विनयस्य, ज्ञानस्य, आचरणस्य च सन्निवेशं कुरुतः। पिता महाशीलः महाश्रोत्रियः भवति स्म। यथा छान्दोग्योपनिषदि उद्दालक आरुणिः स्वपुत्रं श्वेतकेतुं पपाठ।[10] एवमेव भृगुः स्वपितुः महर्षेः वरुणात् ब्रह्मविद्यां जग्राह।[11] याज्ञिकानुष्ठानेषु अपि राजभिः समायोजितानि विद्वत्सम्मेलनानि विद्याग्रहणस्य केन्द्राणि आसन्। एतेषु अनुष्ठानेषु ऋषयः, तत्त्वज्ञाः, विद्वांसः समागत्य जिज्ञासूनां समाधानं कुर्वन्ति स्म।

उपनिषत्प्रतिपादितायाः शिक्षायाः प्राप्तिः गुरुसकाशात् एव भवितुमर्हति। अतः ज्ञानप्राप्त्यर्थं गुरोः सहायता मार्गदर्शनञ्च आवश्यकं भवति। गुरुं विना आध्यात्मिकविद्यायाः प्राप्तिर्न भवति।[12] गुरुशब्दस्तु (१) गृ—गृह्णाति अध्यात्मविद्यायाः उपदेशं ददाति सः गुरुः। (२) गृ—गिरति अज्ञानं (नाशयति अविद्याम्) इति गुरुः अर्थात् ज्ञानेन मानवम् अज्ञानरूपान्धकारात् त्रायति सः गुरुः। आचार्य-अन्तेवासिनोः, गुरु-शिष्ययोः, उपाध्याय-छात्रयोः, शिक्षकशिक्षार्थिनोश्च सम्बन्धस्य यत्स्वरूपमुपनिषत्सु वर्णितमस्ति तस्य कस्यापि समाजस्य युगस्य च आदर्शरूपेण इति परिकल्पयितुं शक्यते।

इयं च शिक्षा वैयक्तिकरूपेण ग्रहणीया भवति अतः सर्वे स्वशक्त्यनुसारं, स्वावश्यकतानुसारञ्च शिक्षाग्रहणं कुर्वन्ति। अपि च उपनिषत्प्रतिपादितं शिक्षा ज्ञानं वा रहस्यमयं गूढञ्च वर्तते। ज्ञानस्य प्राप्त्यनुसारेण ज्ञातुः शक्तिः अनन्तगुणवर्धिता भवति। अतः तज्ज्ञानं योग्याय शिष्याय एवं दातव्यम्। एतदर्थं शिक्षार्थिनः विशेषतानुसारेण तस्य विभागः प्राप्यते। तद्यथा –

[10] द्रष्टव्यः – छान्दोग्योपनिषदः षष्ठोऽध्यायः।

[11] "भृगुर्वै वारुणिः। वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति" – तैत्तिरीयोपनिषत्, २.१.१

[12] "तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्" – मुण्डकोपनिषत्, १.२.१२
"एते ब्रह्मपरा ब्रह्मनिष्ठाः परं ब्रह्मान्वेषमाणा एष ह वै तत्सर्वं वक्ष्यतीति ते ह समित्पाणयो भगवन्तं पिप्पलादमुपसन्नाः" – प्रश्नोपनिषत्, १.१

**शिष्यः** – शासितुं योग्यः शिष्यः।[13] अयञ्च अनुशासनप्रियो भवति। अनुशासनप्रियत्वम् अस्य विशेषधर्मो भवति। अध्ययकाले अनुशासनं प्रतिक्षणं परिपाल्य अयं सामाजिकजीवने साफल्यम् अवाप्नोति।

**छात्रः** – यस्तु केवलस्वाध्यायरतो भूत्वा अध्ययनकाले कृतायाः जिज्ञासायाः समाधानं यदि तत्कालमेव गुरुः न करोति तर्हि अयं धैर्यपूर्वकं प्रतीक्षां करोति। किञ्च गुरोः यत्किञ्चिदपि दोषान् आवृत्य गुरोः यशः सर्वासु दिक्षु तनोति, स "छात्रः" इति व्यवह्रियते।[14] अनेनास्य गुरोः प्रति श्रद्धा, विश्वासः, गाम्भीर्यञ्च विद्योतते।

**विद्यार्थी** – गुरोः समीपं गत्वा प्रणिपातभावेन यः विद्यां याचते सः विद्यार्थी इति[15]। अस्य मुख्यप्रयोजनं विद्यार्जनमेव। अनेनास्य विद्यां प्रति उत्कर्षानुरागः, गुरुं प्रति श्रद्धा शुश्रूषाभावश्च परिलक्षितो भवति।

**अन्तेवासी** – यः गुरोः सान्निध्यं सम्प्राप्य विद्याध्ययनं करोति स अन्तेवासी।[16] तस्य कृते सर्वदा शङ्कासमाधानस्यावसरः उपलब्धः भवति। गुरोः संरक्षणे उषित्वा निरन्तरं गुरुशुश्रूषायाः तेन अवसरः प्राप्यते। अत एतेषु अन्तेवासी एव सौभाग्यशाली भवति। अस्यान्तेवासिनः कर्त्तव्येषु अग्निपरिचर्या, पशुपालनम्, समिदाहरणम्, भिक्षाचर्यादीनि भवन्ति।

**शिक्षायाः अवधिः –**

उपनिषत्सु अध्यात्मशिक्षायाः निश्चिता अवधिः न प्राप्यते तथापि सामान्यरूपेण द्वादशवर्षं यावत् गुरुकुले शिक्षणं भवति। यथा छान्दोग्योपनिषदि आरुणि-उद्दालकस्य पुत्रः श्वेतकेतुः गुरुकुले "द्वादशवर्ष उपेत्य चतुर्विंशतिवर्षः सर्वान् वेदानधीत्य महामना अनूचानमानी स्तब्ध एयाय"[17] इति। अनेन उपनिषत्पाठेन ज्ञायते यत् वेदाध्ययनार्थं गुरुकुले द्वादशवर्षाणि अवधिः भवतीति।

**उपनिषत्काले शिक्षणपद्धयः –**

आधुनिकशिक्षणपद्धत्यनुसारेण उपनिषत्कालेऽपि शिक्षणस्य बहवो हि विधयः प्राप्यन्ते। उपनिषत्सु तात्त्विकचिन्तनं प्रायः संवादरूपेणास्ति। तत्र शिष्यः प्रश्नं करोति, तत्त्वज्ञः गुरुः विभिन्नरीत्या तस्य जिज्ञासायाः समाधानं करोति। शिष्यः मध्ये मध्ये पुनः शङ्कां करोति गुरुश्च पुनः पुनः विभिन्नविधिभिः ताः

---

[13] शास्+क्यप् । (पा.सू. ३.१.१०९)

[14] गुरोर्दोषाणामावरणं छत्रम्, तच्छीलमस्य छात्रः। छत्रादिभ्योः णः। (पा.सू. ४.४.६२)

[15] विद्याम् अर्थयते तच्छीलः विद्यार्थी। विद्या-उपपदे "अर्थ" इति धातोः "सुप्यजातौ णिनिस्ताच्छील्ये" (पा.सू. ३.२.७८) इत्यनेन णिनि।

[16] अन्ते गुरुसमीपे वसति तच्छीलः। पूर्ववत् णिनि प्रत्ययः। "शयवासवासिष्वकालात्" (पा.सू. ६.३.१८) इत्यनेन अलुक्।

[17] छान्दोग्योपनिषत्, ६.१.२





शङ्काः निवारयति। नैकाः उपनिषत्कालीनशिक्षणपद्धतयः आधुनिकशिक्षणविधिरूपेण प्रयुज्यन्ते। वस्तुतस्तु औपनिषच्छिक्षणविधेः मूलमन्त्रोऽस्ति—स्वाध्यायः[18]। स च आधुनिकशिक्षणविधेरपि मूलमन्त्रोऽस्ति। उपनिषत्सु अत्यन्तकठिनदुरवगहनामूर्तविषयबोधने शिष्यस्य योग्यतानुगुणं तत्तत्समयानुगुणं विषयागुणञ्च बहवो हि विधयः स्वीकृताः सन्ति। उपनिषत्कालीनशिक्षणपद्धतीनां विवरणमेवं भवितुमर्हति–

| | | |
|---|---|---|
| (१) संवादपद्धतिः | (२) आख्यायिकापद्धतिः | (३) दृष्टान्तपद्धतिः |
| (४) सूत्रपद्धतिः | (५) प्रश्नोत्तरपद्धतिः | (६) रूपकपद्धतिः |
| (७) समन्वयपद्धतिः | (८) आत्मोक्तिपद्धतिः | (९) प्रायोगिकपद्धतिः |
| (१०) पौनरुक्त्यपद्धतिः | (११) अन्वेषणपद्धतिः इत्यादि। | |

अथ उपर्युक्तासु पद्धतिसु कासाञ्चन पद्धतीनां विवरणपुरस्सरं तासां आधुनिकोपादेयताञ्च प्रतिपाद्यते। तद्यथा—

**आख्यायिकापद्धतिः** – छान्दोग्योपनिषदः पञ्चमाध्याये प्रथमखण्डे विवदमानानां वागादीन्द्रियाणां निर्णयार्थम् अयं विधिः प्रयुक्तः। तत्र सर्वाणि इन्द्रियाणि प्राणाः वा "अहं श्रेयानस्मि, अहं श्रेयानस्मि" इति प्रयोजनेन व्यूदिरे। आत्मनः श्रेष्ठत्वविज्ञानाय ते पितरं प्रजापतिं जग्मुः। प्रजापतिः तान् उवाच यत् युष्माकं मध्ये यस्मिन् उत्क्रान्ते शरीरं पापिष्ठतरमिव दृश्येत स वः श्रेष्ठः इति। एकैकरूपेण सर्वाणि इन्द्रियाणि शरीरात् बहिर्गत्त्वा परीक्षणमकार्षुः, किन्तु शरीरं पापिष्ठतरमिव नाभूत्। यदा तु प्राणः शरीरात् उच्चिक्रमिषन् तदा सर्वाणि इन्द्रियाणि स्वस्वस्थानेषु स्थातुम् अनुसहमानाः भूत्वा मुख्यप्राणस्य श्रेष्ठत्वं स्वीचक्रुः।

**दृष्टान्तपद्धतिः** –छान्दोग्योपनिषदि षष्ठाध्यायस्य द्वादशखण्डे दृश्यमानजगद्रूपस्थूलकार्यजातस्य कारणं ब्रह्म सूक्ष्मरूपेण भवतीति प्रदिपादनावसरे उद्दालकः स्वशिष्याय श्वेतकेतवे न्यग्रोधफलस्य दृष्टान्तं प्रदर्शयति। सः शिष्यं पुरतः विद्यमानस्य वृक्षस्य न्यग्रोधफलमानीय तस्य छेदनं कर्तुम् आदिशति। पुनः पुनः छेदनेन फलस्य सूक्ष्मबीजानि अवशिष्यन्ते। तेषामपि छेदनेन अत्यन्तसूक्ष्मभागाः अवशिष्यन्ते। अयमेव अल्पपरिमाणविशेषः सूक्ष्मभागः बृहदाकारस्थूलशाखास्कन्धफलपलाशकारक-वृक्षस्य कारणं भवति तथैव अत्यन्तं सूक्ष्मं ब्रह्म अस्य दृश्यमानकार्यप्रपञ्चजातस्य कारणं भवतीति हे श्वेतकेतो! त्वं विजानीयाः।[19] एवमेव मुण्डकोपनिषदि ब्रह्मणः अभिन्ननिमित्तोपादानकारणत्वं निरूपयितु ऊर्णनाभेः दृष्टान्तः प्रतिपादितः। यद्यपि लोके उपादानकारणं निमित्तकारणञ्च भिन्नरूपेण दृश्यते परं ब्रह्मणः अभिन्ननिमित्तोपादानत्वप्रतिपादने दृष्टान्तोऽयमतीव सरलतया प्रदर्शितः।[20]

---

[18] "स्वाध्यायान्मा प्रमद" – तैत्तिरीयोपनिषत्, १.११.१

[19] द्रष्टव्यम् – छान्दोग्योपनिषत् ६.१२.१-३

[20] "यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः सम्भवन्ति। यथा सतः पुरुषात्केशलोमानि तथाऽक्षरात्सम्भवतीह विश्वम्॥"– मुण्डकोपनिषत्, १.१.७

वस्तुतः विषयः यदि अमूर्तः भवति तर्हि तादृशविषयस्य प्रतिपादनं दृष्टान्तैः विना कर्तुमशक्यम्। इत्यतः आधुनिकेऽपि शिक्षणविधौ सूक्ष्मविषयाणां प्रतिपादनं प्रत्यक्षरूपेण साधारणतया विद्यमानानां दृष्टान्तानां प्रदर्शनपुरस्सरं क्रियते।

**प्रश्नोत्तरपद्धतिः** – अत्यन्तोद्दण्डच्छात्राणां गर्वापहरणे इयं पद्धतिः प्रयुज्यते। यथा तत्रैव छान्दोग्योपनिषदि द्वादशवर्षीयः श्वेतकेतुः पितुराज्ञानुसारमाचार्यस्य समीपं गत्त्वा द्वादशवर्षं यावत् सार्थपूर्वकं चतुरः वेदान् ज्ञात्वा अनूचानमानी अप्रणतस्वभावः गृहम् एयाय। तदेवं भूतम् आत्मनोऽननुरूपशीलं अप्रणतस्वभावं मानिनं पुत्रं दृष्ट्वा सद्धर्मावतारचिकीर्षया पितोवाच—हे श्वेतकेतो! येन परं ब्रह्मादिश्यते तमादेशं गुरुं पृष्टवान् वा? येनाश्रुतं श्रुतं भवति, अमतं मतं भवति, अविज्ञातं विज्ञातं भवति, एकविज्ञानेन सर्वविज्ञानं भवति? तमादेशं किं गुरुं पृष्टवान्? तदा श्वेतकेतुः वदति कथं नु भगवः स आदेशो भवतीति। गुरोः अद्भुतसारगर्भितवचनं श्रुत्वा एकस्य विज्ञानेन कथं सर्वविज्ञानं भवति? नैतद्धि लोकप्रसिद्धं, नाहं जानामि। अतः भगवन्! केन प्रकारेण स आदेशो भवतीति। एवंरूपेण गर्वोपहृतः श्वेतकेतुः तमादेशं ज्ञातुं गुरुं प्रार्थयति। आधुनिकेऽपि अविनीतच्छात्रस्य गर्वापनयनार्थम्, अविज्ञातनूतनविषयज्ञानस्य प्रेरणार्थं, नूतनविषयज्ञानार्थं सिद्धतायाः कृते अयः विधिः प्रयुज्यते।

**प्रायोगिकपद्धतिः** – इयं पद्धतिः छान्दोग्योपनिषदि षष्ठाध्यायस्य पञ्चमखण्डतः सप्तमखण्डपर्यन्तं वर्णितास्ति। अत्र व्याख्यानविधिं दृष्टान्तविधिश्च अनुसृत्य उद्दालकः श्वेतकेतोः शङ्कानिवारणं करोति। यदा तु श्वेतकेतोः शङ्का न निवृत्ता तदा कठिनविषयस्य बोधनाय गुरुः प्रायोगिकविधिं प्रयुयुजे।[21] अत्र गुरुः उद्दालकः शिष्यं श्वेतकेतुमुद्दिश्य अन्नमयं हि मनः आपोमयः प्राणः तेजोमयी वागिति प्रतिपादयति। गुरोः प्रतिपादनान्तरं श्वेतकेतुः वदति— हे भगवन्! कथं मनसः अन्नरसेन उपचय भवति इत्येतत् नाद्यापि समाहितमिति। श्वेतकेतोः एवं कथिते सति मनसः अन्नमयत्वं सदृष्टान्तं विवृणोति— यत् मथ्यमानस्य दध्नः सूक्ष्मभागः एकत्र सम्मिल्य नवनीतरूपेण सर्पिरूपेण च परिणमते। एवमेव भक्षितस्य अन्नस्य यः

[21] "अन्नमयं हि सोम्य मन आपोमय प्राणस्तेजोमयी वागिति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच।

दध्नः सोम्य मथ्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति तत्सर्पिर्भवति।
एवमेव खलु सोम्यान्नस्याश्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति तन्मनो भवति॥
अपां सोम्य पीयमानानां योऽणिमा स ऊर्ध्वः समुदीषति स प्राणो भवति॥
तेजसः सोम्याश्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति सा वाग्भवति॥
अन्नमयं हि सोम्य मन आपोमय प्राणस्तेजोमयी वागिति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच।"

– छान्दोग्योपनिषत् ६.६.१-५





सूक्ष्मभागः तत् मनःरूपेण, पीतानामपां सूक्ष्मभागः प्राणरूपेण, तेजसः सूक्ष्मभागः वाग्रूपेण परिणमते इति सदृष्टान्तं उक्तं चेदपि श्वेतकेतुः एतत्सर्वं स्पष्टयितुं पुनः गुरुं प्रार्थयति।[22]

तदा गुरुः सिद्धान्तमेनं स्पष्टीकर्तुं कश्चित् प्रयोगं करोति। "षोडशकलः सोम्य पुरुषः पञ्चदशाहानि माशीः काममपः पिबापोमयः प्राणो न पिबतो विच्छेत्स्यत इति[23]" इति ग्रन्थेन मनसः अन्नरसोपचितत्त्वं दर्शयितुम् अन्नरसजनितां शक्तिं कलात्वेन कल्पयति। वस्तुतः भुक्तस्य अन्नस्य सूक्ष्मांशा मनसि शक्तिं जनयति। अन्नद्वारा विकासं प्राप्तायाः अस्याः शक्तेः उपनिषत्सु कलात्वेन कल्पनं दृश्यते। तया शक्त्या संयुक्तः कार्यकरणसङ्घातलक्षणो जीवविशिष्टः पुरुषः षोडशकल इत्युच्यते। एताभिः कलाभिः पुरुषः द्रष्टा, श्रोता, मन्ता, बोद्धा, कर्त्ता, विज्ञाता, सर्वक्रियासमर्थो भवति। एतासां कलानामभावे तु स सामर्थ्यहीनो भवति। यदि त्वं एतादृशषोडशकलाविशिष्टस्य पुरुषस्य प्रत्यक्षीकर्तुम् इच्छसि चेत् पञ्चदशदिनपर्यन्तम् अशनं मा कुर्याः, केवलं जलं पिब। जलमात्रस्वीकरणेन प्राणानां विच्छित्तिः नैव भवतीति। श्वेतकेतुः तथैव कृत्वा हीनतां प्राप्तवान्। षोडशे दिने आचार्यसमीपं गत्वा ब्रवीति "किं ब्रवीमि" इति। ऋग्यजुष्साममन्त्राणामध्ययनं कुरु इति गुरुः वदति। तदा श्वेतकेतुः वदति यद् मामृगादीनि न प्रतिभान्ति मम मनसि न दृश्यन्ते। तदा गुरुः वदति यत् अन्नेन विकसिते षोडशकलायुक्तपुरुषे पञ्चदशदिनानाहारेण पञ्चदशकलाः विनष्टाः, एककलामात्रम् अवशिष्टा वर्तते। तया ऋगादीनि न प्रतिभान्ति। हे सोम्य! इदानीं खद्योतमात्राङ्गारकतुल्यया एकया कलया त्वं वेदान् नानुभवसि, अतः भुङ्क्ष्व इति। खद्योतमात्रं परिशिष्टं तं तृणैः चूर्णैः उपसमाधाय वर्धयेत्, तेन अङ्गारः पूर्वपरिमाणं प्राप्नोति। एवमुक्ते सति श्वेतकेतुः षोडशे दिने अशयित्वा गुरोः उपदेशं श्रोतुं गुरुम् उपससाद। गुरोः पृष्टे सति ऋगादिमन्त्राणामर्थमवगन्तुं शक्तः जातः। मनसादीनाम् अन्नमयत्वादिविषयान् विशेषरूपेण प्रतिपेदे।

अत्र मनसः अन्नमयत्वप्रतिपादनार्थं व्याख्यानविधिः स्वीकृतः। शिष्येन पुनः प्रार्थिते सति दृष्टान्तविधिः अनुसृतः। तदापि शिष्यस्य शङ्का न निवृत्ता तदा प्रायोगिकविधिमनुसृत्य कठिनविषयस्य बोधनं कृतम्।

**पौनरुक्त्यपद्धतिः** – छान्दोग्योपनिषदि षष्ठाध्यायस्य प्रथमखण्डे अस्याः पद्धतेः वर्णनं प्राप्यते। यदा आरुणिः उद्दालकः श्वेतकेतुम् एकविज्ञानेन सर्वविज्ञानं भवतीति प्रतिज्ञामुवाच तदा श्वेतकेतुः वदति कथं नु भगवः सः आदेशो भवतीति। एवं पृष्टे सति गुरुः मृत्पिण्डोदाहरणेन एतत् स्पष्टयति। कारणे मृत्पिण्डे विज्ञाते सति कार्यमन्यद्विज्ञातं भवति कार्यकारणयोरनन्यत्वात्। श्वेतकेतोः स्पष्टप्रतिपत्यर्थम् आरुणिः उद्दालकः एतद्विज्ञानं नवकृत्वा तम् उपदिशति। एवञ्च पौनःपुन्येन मृत्पिण्ड-नदी-वृक्ष-न्यग्रोधफल-लवण-तप्तपरशुग्रहणादिविभिन्नदृष्टान्तपुरस्सरम् तत्तत्वम् अनूद्य श्वेतकेतवे "तत्त्वमसि" इति आत्मैकत्वविज्ञानम् अनुभावयति।[24]

[22] "भूय एव मा भगवान्विज्ञापयत्विति" –छान्दोग्योपनिषत् ६.६.५

[23] छान्दोग्योपनिषत् ६.७.१

[24] "स आत्मा तत्त्वमसि श्वेतकेति इति तद्धास्य जिजज्ञाविति" - छान्दोग्योपनिषत् ६.१६.३

**अन्वेषणपद्धतिः** – कदाचित् आचार्याः शिष्यम् अत्यल्पमेव अध्यापयित्वा अत्यधिकम् अन्वेषणे प्रोत्साहयन्ति इत्याकारकोऽपि विधिः उपनिषत्सु क्वचित् श्रूयते। यथा तैत्तिरीयोपनिषदि भृगुवल्ल्यां वरुणः स्वपुत्रं भृगुं वदति "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद् ब्रह्मेति[25]" अत्र तपसा तद् ब्रह्म विजिज्ञासस्व इति वदति वरुणः। सः भृगुः तपसा अन्वेषणमारभ्य प्रथमतया अन्नं ब्रह्मेति व्यजानात्। तदनु प्राणो ब्रह्मेति, मनो ब्रह्मेति, विज्ञानं ब्रह्मेति क्रमेण व्यजानात्। अन्ते च तपसा आनन्दो ब्रह्मेति इति परमं तत्त्वं व्यजानात्। एवं क्रमेण गुरूपदिष्टमार्गेण स्वयमेव अन्वेषणं कृत्वा तत्त्वज्ञानं प्राप्नोति। वस्तुतः यावच्छात्राणाम् अभिरुचिः न भवति तावत् दुरुहविषयाणाम् अवगमनसामर्थ्यं छात्राणां नैव भवति। अतः नूतनविषयबोधनाय छात्रेषु योग्यता अत्यन्तमपेक्ष्यते। एतद्विषये कठोपनिषदि यम-नचिकेतयोः संवादः अत्यन्तादर्शरूपेण वर्तते। पितुः आदेशात् नचिकेता यमसदनं प्रविश्य यमस्य आगमनार्थं दिनत्रयम् अन्नजलग्रहणं विना प्रतीक्षां करोति। यमस्य प्रत्यागमनानन्तरं "तिस्रो रात्रीर्यदवात्सीर्गृहे मे तस्मात् त्रीन् वरान् वृणीष्व[26] इति यमादेशात् प्रथमवररूपेण पितुः स्वस्थताप्राप्तिं, द्वितीयवररूपेण अग्निविद्यां, तृतीयवररूपेण च "येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके[27]" इत्यनेन ब्रह्मविद्यां प्रार्थितवान्। यदा यमः नचिकेतसः ब्रह्ममात्रज्ञानाधिकारी न वा इति योग्यतायाः परीक्षणार्थं शतायुष पुत्रपौत्रान् वृणीष्व, बहून् पशून् हस्तिहिरण्यमश्वान् वृणीष्व, किं चिरजीविकाश्च वृणीष्व इति वदति तदा यमेन प्रदर्शितैः नानाविधैः प्रलोभैः नचिकेता न विचचाल। एवं पात्रपरीक्षायाः परं यमः निःश्रेयसाधिकारीत्यवगम्य नचिकेतसः सर्वापह्नवसिद्धब्रह्ममात्रावगतये तदुपायत्वेन ब्रह्मविद्याम् आह।

**उपसंहृतिः** –एवम् आधुनिकैः प्रयुज्यमानाः प्रायः सर्वाः अपि पद्धतयः उपनिषत्सु वरीवर्तन्ते। तासामुपयोगः न केवलं साम्प्रतिके युगे भावियुगेष्वपि भविष्यति। अतः औपनिषच्छिक्षा कस्यचित् कालविशेषस्य शिक्षाप्रणाली नास्ति, औपनिषत्सिद्धान्तानां प्रयोगः सार्वकालिकः। यतो हि अत्रत्य प्रश्नाः आत्मज्ञानेन सम्पृक्ताः सन्ति। आत्मनः उत्तरोत्तरावस्थायाः यद्वर्णनं पञ्चकोषेषु प्राप्यते तदेव शिक्षोद्देश्यानाम् उत्तरोत्तरसोपानानि प्रस्तौति। औपनिषच्छिक्षादर्शने अस्माकं कृते आजीविका-स्वास्थ्य-ज्ञान-विज्ञान जीवनविकासस्य च या शिक्षा काम्यते सा पुरातनेऽपि काले उपादेया आसीत्, आगामिकाले च तथैव महत्त्वपूर्णा भविष्यतीति शम्।

---

[25] तैत्तिरीयोपनिषत्, ३.१.३

[26] "तिस्रो रात्रीर्यदवात्सीर्गृहे मेऽनश्नन्ब्रह्मन्नतिथिर्नमस्यः।
नमस्तेऽस्तु ब्रह्मन् स्वस्ति मेऽस्तु तस्मात्प्रति त्रीन्वरान्वृणीष्व॥" – कठोपनिषत् १.१.९

[27] कठोपनिषत् १.१.२१